पंच प्रयोगः
यंत्रतंत्रसुधानिधि

Pancha Prayoga	Title
Sāyaṇācārya.	Author
	Editor
Saka 1703.	Year, Vols.
	Publisher
	Remarks

॥श्रीगणेशायनमः॥पंचप्रयोगिप्रारंभः॥प्लवनामसंवत्सरे वैशाखशुद्ध तृतिया ६६

७ ॥स्पतवाहिंप्रारंभः॥ ७॥

२=यजमानो यदि केशश्मश्रु वापयिष्यमाणः स्यात् केशश्मश्रूणि वापयित्वेति केशवस्वामी=२

दर्श०पूर्ण० ॥श्रीगणेशाय नमः॥ अथ दर्शपौर्णमासप्रयोगः॥ उक्तान्वाधानदिने प्रातरग्निहोत्रं हुत्वा केशश्मश्रु
१ लोम नखानि वापयित्वा सपत्नीकः स्नातो नवनीताभ्यंजनः कृतांजनश्चैकविंशतिदर्भपिंजूलैः पवनं कु पिंजूलं
प्राणदेशं वा र्यात्। पत्नी च ऋत्विजश्च पवनादिश्रयं कुर्युः। सप्तभिर्मुखं संमृजीत। सप्तभिः शिरः संमृजीत। सप्तभिर्गुल्फौ विशुखा दर्भाः
संमृजीत। पिंजूलानि प्रोक्ष्योदङ् निरस्याप उपस्पृश्य मंत्राचमनं कुर्यात्। आपो हि ष्ठा मयो भुव इत्यृचा न
ऊर्जे दधातन। महे रणाय चक्षसे। इति मंत्रप्राश्य॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरि
व मातरः। द्वितीयं। तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः। तृतीयं। व्याहृति
भिस्त्रिर्मुखं संमृजीत। भूः। दक्षिणतः। भुवः। उत्तरतः। स्वः। अलोमकावीछो। शेषं समाप्य ततो
मार्जनं। दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत्प्रण आयूंषि तारिषत्।
आपो हि ष्ठा०। यो वः शिवतमो०। तस्मा अरं०। यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतं। मिनीमसि १
द्यविद्यवि। यत्किंचेदं वरुण दैव्ये जने भिद्रोहं मनुष्याश्चरामसि। अचित्ती यत्तव धर्मा युयोपिम मा
नस्तस्मादेनसो देव रीरिषः। कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म। सर्वा ता विष्य
शिथिरेव देवाथा ते स्याम वरुण प्रियासः। हिरण्यवर्णाः शुचयः पावकाः यासु जातः कश्यपो या

३=पत्न्यपि वपनाभ्यंजनांजनवर्जं करोति। अध्वर्युरेव तस्याः प्रोक्षिता=३

सर्वं

स्विंद्रः। अग्निं या गर्भं दधिरे विरूपास्ता न आपः शं स्योना भवंतु। यासां राजा वरुणो याति मध्ये सत्यानृते अ
वपश्यं जनानां। मधुश्चुतः शुचयो याः पावकास्ता न आपः शं स्योना भवंतु। यासां देवा दिवि कृण्वंति भक्षं
या अंतरिक्षे बहुधा भवंति। याः पृथिवीं पयसोंदंति शुक्रास्ता न आपः शं स्योना भवंतु। शिवेन मा चक्षुषा
पश्यतापः शिवया तन्वोप स्पृशत त्वचं मे। सर्वां अग्नीं रप्सुषदो हुवे वो मयि वर्चो बलमोजो नि धत्त।
पवमानः सुवर्जनः। पवित्रेण विचर्षणिः। यः पोता स पुनातु मा। पुनंतु मां देवजनाः। पुनंतु मनवो धिया। पु
नंतु विश्व आयवः। जातवेदः पवित्रवत्। पवित्रेण पुनाहि मा। शुक्रेण देव दीद्यत्। अग्ने क्रत्वा क्रतूंरनु।
यत्ते पवित्रमर्चिषि। अग्ने विततमंतरा। ब्रह्म तेन पुनीमहे। उभाभ्यां देव सवितः। पवित्रेण सवेन च।
इदं पुनीमहे। वैश्वदेवी पुनती देव्यागात्। यस्यै बह्वीस्तनुवो वीतपृष्ठाः। तया मदंतः सधमाद्येषु व
यं स्याम पतयो रयीणां। वैश्वानरो रश्मिभिर्मा पुनातु। वातः प्राणेनेषिरो मयोभूः। द्यावापृथिवी
पयसा पयोभिः। ऋतावरी यज्ञिये मा पुनीतां। बृहद्भिः सवितस्तृभिः। वर्षिष्ठैर्देव मन्मभिः। अग्ने
दक्षैः पुनाहि मा। येन देवा अपुनत। येनापो दिव्यं कशः। तेन दिव्येन ब्रह्मणा। इदं ब्रह्म पुनीमहे।
यः पावमानीरध्येति। ऋषिभिः संभृतं रसं। सर्वं स पूतमश्नाति। स्वदितं मातरिश्वना। पावमा

दर्शपूर्ण० मार्यो अध्येति। ऋषिभिः संभृतꣳ रसं। तस्मै सरस्वती दुहे। क्षीरꣳ सर्पिर्मधूदकं। पावमानीः स्वस्त्ययनीः।
सुदुघा हि पयस्वतीः। ऋषिभिः संभृतो रसः। ब्राह्मणेष्वमृतꣳ हितं। पावमानीर्दिशंतु नः। इमं लोकम
२ थो अमुं। कामांत्समर्धयंतु नः। देवीर्देवैः समाभृताः। पावमानीः स्वस्त्ययनीः। सुदुघा हि घृतश्चु
तः। ऋषिभिः संभृतो रसः। ब्राह्मणेष्वमृतꣳ हितं। येन देवाः पवित्रेण। आत्मानं पुनते सदा। तेन
सहस्रधारेण। पावमान्यः पुनंतु मा। प्राजापत्यं पवित्रं। शतोद्यामꣳ हिरण्मयं। तेन ब्रह्मविदो व
यं। पूतं ब्रह्म पुनीमहे। इंद्रः सुनीती सह मा पुनातु। सोमः स्वस्त्या वरुणः समीच्या। यमो राजा प्र
मृणाभिः पुनातु मा। जातवेदा मोर्जयंत्या पुनातु। भूर्भुवः स्वः। कया नश्चित्र आभुवदूती
सदावृधः सखा। कया शचिष्ठया वृता। कस्त्वा सत्यो मदानामꣳहिष्ठो मत्सदंधसः। दृढा चि
दारुजे वसु। अभीषुणः सखीनामविता जरितॄणां। शतं भवास्यूतिभिः। तरत्समंदी धावति २
धारा सुतस्यांधसः। तरत्समं०। उस्रा वेद वसूनां मर्तस्य देव्यवसः। तरत्समं०। ध्वस्रयोः पुरु
षंत्योरा सहस्राणि दद्महे। तरत्समं०। आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे। तरत्समं०।

१ = प्रागुदग्दर्भेषु सह होपविश्य पत्न्या परा गेर परस्त्र विल्वं ध्यात्वा सहर्ष्योदिषु सह स्निपत्न्या कृतिं जपित्वा गुरुमीरयेत्। इत्नीयमा
ये नाम समौकर्णे मेत्त तः परं यक्ष्य इति स्मृता गुरुः। शुद्ध इति कल्पः॥

इति प्रतिमंत्रं मार्जयित्वा विद्धकरयो मध्ये न प्रप्रपद्य पश्चाद्गार्हपत्यस्य प्राक्कूलेषु दर्भेष्वासीनो दर्भान्धारयमा
णः पवित्रपाणिः पत्न्या सह प्राणानायम्य विष्णुं स्मृत्वा जपति। ॐ याः पुरस्तात्प्रस्रवंत्युपरिष्टात्सर्वतश्च
याः। ताभी रश्मिपवित्राभिः श्रद्धां यज्ञमारभे। देवा गातुविदो गातुं यज्ञाय विंदत। मनसस्पतिना देवेन वा
ताद्यज्ञः प्रयुज्यतां। श्रद्धा एवृद्धि। सत्येन त्वाह्वयामि। आकूत्यै त्वा कामाय त्वा समृधे त्वा पुरो दधे। अमृ
तत्वाय जीवसे। आकूतिमस्यावसे काममस्य समृध्यै। इंद्रस्य युंजते धियः। आकूतिं देवीं मनसः पु
रो दधे यज्ञस्य माता सुहवा मे अस्तु। यदिच्छामि मनसा सकामो विदेयमेनद्धृदये निविष्टं॥ स्वर्गका
मः पौर्णमासेन हविषा यक्ष्ये। त्रिरूपांशु त्रिरुच्चैः। दर्शे स्वर्गकाम आमावास्येन हविषा यक्ष्ये। त्रिरु
पांशु त्रिरुच्चैः। सलिलः प्रति० तन्मऋध्यतां तन्मे समृध्यतां तन्मे संपद्यतां कामः। ऋत्विजः। तत्त
ऋध्यतां तत्ते समृध्यतां तत्ते संपद्यतां कामः। यजमानः। ॐ तथा। पौर्णमासꣳ हविः। व्रीहिमयः पु
रोडाशो द्रव्यं० आज्यं च० अग्नीषोमावाज्यभागदेवते। अग्निः विष्णुः अग्नीषोमौ इंद्रो वैमृध
श्च प्रधानदेवताः। पंच प्रयाजाः त्रयो नुयाजाः अष्टौ पत्नीसंयाजाः अग्निः स्विष्टकृत्। स्रुक्ते वाकशंयु

४ = यजमानस्तिष्ठन्निति जपः इति केचित् (margin) — स्वामी = ४

१ = पत्नी यजमानो नो तीर्थेन प्रप्रपद्य पश्चाद्गार्हपत्यस्य प्राग्युरखावुपविश्यातः उत्तरतः पतिः दक्षिणे पत्नी = १
२ = उद्धरणपक्षे अग्निद्वयं विहृत्याह = २ - २ = पक्षे वैमृधः पौर्णमास्यां = २

इन्द्रो महेन्द्रो वा सोमयाजिनः

यद्वा दर्शो वा की। इत्याद्यो गदेवताः। एवमात्मकेन सांगोपांगेन कर्मणा श्वो यक्ष्ये। दर्शे अमावास्यं हविः। व्रीहि
३ मयः पुरोडाशो द्रव्यं। आज्यं च। अग्नीषोमावाज्यभागदेवते। अग्निः विष्णुः इन्द्राग्नी इति प्रधानदेवताः।
पंच प्रयाजा इत्यादि श्वो यक्ष्य इत्यंतं। सद्यस्काल पौर्णमासपक्षे सद्यो यक्ष्य इति। अस्मिन्कर्मण्यध्वर्युत्वा
महं वृणे। अध्वर्युः पवनादिभिः संस्कृतो हुतो स्मि कर्म करिष्यामि। आचम्य वेद्याः कर्या मध्येन प्रपु ६३
घय यजमानादुत्तरत उपविश्य जपति। इडा देव हूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शंसिषद्विश्वे
देवाः सूक्तवाचः पृथिवी मातर्मा मा हिंसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि
मधुमतीं देवेभ्यो वाचमुद्यासं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवंतु शोभायै पितरोनुमदंतु।
देवा गातुविदो० इति प्रयुज्यतां। अध्वर्युर्यजमानो वाग्नीनन्वादधाति। गार्हपत्यस्य पश्चादासी
स नैनोपविश्य तिस्रः स्थूलाः समिधो भ्यादधाति। ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेंधानास्तनु २
वं पुषेम। मह्यं नमंतां प्रदिशश्चतस्रस्त्वया ध्यक्षेण पृतना जयेम। प्रथमां। मम देवा विहवे संतु
सर्व इन्द्रावंतो मरुतो विष्णुरग्निः। ममांतरिक्षमुरुगोपमस्तु मह्यं वातः पवतां कामे अस्मिन्।

अन्वादधीत स्वयं वा स्वाहेति भरादिभिना परेषु = २ कल्पसारः

द्वितीयां। मयि देवा द्रविणमा यजंतां मय्याशीरस्तु मयि देवहूतिः। दैव्या होतारा वनिषंत पूर्वेरिष्टाः
स्याम तन्वा सुवीराः। तृतीयां। एवं दक्षिणाग्नावुद्धृते पूर्ववदुपविश्य तिस्रः। मह्यं यजंतु मम यानि
हव्याकूतिः सत्या मनसो मे अस्तु। एनो मा निगां कतमच्चनाहं विश्वे देवासो अधिवोचता मे। १
देवीः षडुर्वीरुरुणः कृणोत विश्वे देवास इह वीरयध्वं। माहास्महि प्रजया मा तनूभिर्मा रधाम द्वि
षते सोम राजन्। २। अग्निर्मन्युं प्रतिनुदन्पुरस्ताद् दब्धो गोपाः परिपाहि नस्त्वं। प्रत्यंचो यंतु ६५
निगुतः पुनस्ते मैषां चित्तं प्रबुधा विनेशत्। ३। अपरेण गार्हपत्यमाहवनीयमेत्य प्रत्यङ्मुख उद
ङ्मुखस्तिष्ठन्पूर्ववत्समिधो भ्यादधाति। धाता धातॄणां भुवनस्य यस्पतिर्देवं सवितारम
मा× भिमातिषाहं। इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पांतु यजमानं न्यर्थात्। १। उरुव्यचा नो महिषः
शर्म यंसदस्मिन्हवे पुरुहूतः पुरुक्षुः। स नः प्रजायै हर्यश्व मृडयेंद्र मा नो रीरिषो मा परादाः। २।
येनः सपत्ना अपते भवंत्विंद्राग्निभ्यामवबाधामहे तान्। वसवो रुद्रा आदित्या उपरिस्पृशो

२ परिसमूहनवारिसमुक्षणे कृतभुजां शकता परिलेपनं । कुसुमकाष्ठसमाहरण व्रतं वदन्ति रूपमिदोपवसथ्ये कं = २

दर्शपूर्ण॰ मीग्रं चेत्तारमधिराजमक्रन् २ । समिध आधाय दशाग्नौ किंचित्पुरस्तात्तिष्ठन्निगदेत् । अर्वा
चमिंद्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः । इमं नो यज्ञं विहवे जुषस्वास्य कुर्मो हरि
४ वो मेदिनं त्वा । गार्हपत्यादीन्परिसमुह्य पर्युक्ष्याग्निनं लकुर्वते ध्वर्युर्यज [illegible] पत्नीं वाय
आहवनी जमानस्तीर्थेन निर्गत्यायेणाहवनीयं परीत्यास्यायतनउपविश्य तिरःपवित्रमपआनयति
यस्य दक्षि पयस्वतीरोषधयः पयस्वद्वीरुधां पयः । अपां पयसो यत्पयस्तेन मामिंद्र संसृज । इदं स्त्रीं ।
णपश्चिमदे शेषं समाप्याहवनीयं परिषिच्य समिधमादधाति । अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे
शे ४ राध्यतां स्वाहा । अग्नये व्रतपतय इदं न मम । वायो व्रतपते व्रतं चरिष्यामि त॰ ता॰
स्वाहा ॰ । वायवे व्रतपतय इदं न मम । आदित्य व्रत॰ ता॰ स्वाहा । आदित्याय व्रतपतय इदं । व्र ४
तानां व्रत॰ ता॰ स्वाहा । व्रतानां व्रतपतय इदं न मम । पुनः परिषिंचति । अध्वर्युर्जघनेन गा
र्हपत्यं तिष्ठन्नसिमादत्ते । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाद
दे । सव्येन धृत्वा दक्षिणेनाभिमंत्रयते । अभिमेक्षणं नाम अभिशमनेन मे वेक्षणं वा । यज्ञस्य

त्रीनियओछिवेसंस्कृमी

घोषदसि । गार्हपत्ये प्रतितपति । प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः । आहवनीयदेशं गच्छति । प्रेयम
गाद्धिषणा बर्हिरच्छ मनुना कृता स्वधया वितष्टा त आवहंति कवयः पुरस्ताद्देवेभ्यो जुष्टं वेदि
मवेक्षते । दूरबर्हिरासदे । प्राक्प्रत्वं बर्हिस्तम्बपदानि गत्वाप्रडष्टगच्छति यत्र बर्हिः दर्भदेशं गत्वा
प्रस्तरपर्याप्ते दर्भमुष्टिं परिगृह्णाति । एकवासमं प्रस्तरमाहर्दैव्यो । तस्य देवानां परिषूतमसि । अ
सिदे नोर्ध्वे मुन्माष्टि । वर्षवृद्धमसि । असिं छेदनदेशे निदधाति । देव बर्हिर्मा त्वान्वङ्गा
तिर्यक्पर्व ते राध्यासं । आच्छिनत्ति । आच्छेत्ता ते मा रिषं । अपउपस्पृश्य छेदनमभिमृशति ।
देवबर्हिः शतवल्शं विरोह । आत्मानं प्रत्यभिमृशति । सहस्रवल्शा वि वयं रुहेम । अपउ
पस्पृश्य सर्वं छित्वा प्रस्तरं विंक्ति । तं कृत्वा निधो निदधाति । एवं छेदनभेदखननिरसनपि
त्तराक्षसनैर्ऋतरौद्राभिचारणीयेषु उपस्पृशेत् । पृथिव्याः संपृचः पाहि । अतऊर्ध्वं लूनौ
त्रीन्पंचवा सप्त नव वैकादश वा लुनाति यावता पर्याप्तं मन्यते । ततः संधित्रयमुक्तं प्रदक्षिण
मावेष्टितं द्विगुणं कृत्वाऽप्रदक्षिणवेष्टितं शुल्वं करोति । दुनं दग्रं निदधाति । आदित्यै रास्नासि ।

यज्ञ० दर्श० शल्वेर्दर्भमुष्टीन्निधायोपरि प्रस्तरं संभरति। स्वसंस्थ ता ला सं भरामि। सं नह्यति। इंद्राण्यै सं
५
नहनं। ग्रंथिं करोति। पूषा ते ग्रंथिं ग्रथ्नातु। पश्चाद्दात्राग्रमुपगूहति। स ते मास्थात्। उद्यच्छति।
इंद्रस्य त्वा बाहुभ्यामुद्यच्छे। तल्लीं शीर्ष्णि तृणं निधाय बर्हिर्निदधाति। बृहस्पतेर्मूर्ध्ना हरामि।
गार्हपत्यमेति। उर्वंतरिक्षमन्विहि। अंतर्वेदि स्फ्यं वा शकटे वा निधाय तस्मिन्निदधाति। त
ल्लीं निधायादाय यत्र स्रुचः निधास्यन्स्यात्तत्र मंत्रेण निदध्यात् उत्तरेण गार्हपत्यमनधः
सादयति। देवंगममसि। स्नुसंसादयति। तल्लीं परिभोजनीयादीन् लुनाति। दर्शे सिद्ध दा
छिन्नं च। तथैव शल्वं कृत्वा एकविंशतिदारुकमिध्मं बध्नाति। यत्कृष्णो रूपं कृत्वा प्रावि
शस्त्वं वनस्पतीन्। ततस्त्वामेकविंशतिधा संभरामि सुसंभृता। वेदं करोति। दर्भमुष्टि
मावेष्ट्य द्विगुणं कृत्वाग्रभागे प्रादेशानंतरं बध्वाऽग्राणि छिनत्ति। स वेदः शरायिन वत्सना ५
नुसदृश मे दर्शे वेदं कृत्वा वेदिं करोति प्रागुत्तरासरिग्यहात्। अध्वर्युर्वेदमादत्ते। अयं वेदः
पृथिवीमन्वविंदद्गुहा सतीं गहने गह्वरेषु। स विंदतु यजमानाय लोकमच्छिद्रं यज्ञं भूरि

१=त्रयः बाहुमात्राः परिधयः प्रादेशोर्ध्वप्रमाणा इध्मसंनिधः= तल्लीं तु दीवीनामग्रविहव्यः=

१=उपसमीपा पाथि स्थितमध्ये=१

कर्मा करोतु। वेदेन वेदिं समुदगपवर्गं प्रागवसानं त्रिः संमार्ष्टि। वेदेन वेदिं विविदुः पृथिवीं
सा पप्रथे पृथिवी पार्थिवानि। गर्भं बिभर्ति भुवनेषु अंतस्ततो यज्ञो जायते विश्वदानिः। छित्व
ल्ली। वेदं निधाय वेद्याः पश्चात्तिष्ठन् दर्भाभ्यां सहस्फ्यमादत्ते। देवस्य त्वा स० भ्यामाददे।
सव्येन धृत्वा दक्षिणेनाभिमंत्रयते। इंद्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजाः
दर्भेन स्फ्यं निमार्ष्टि। वायुरसि तिग्मतेजाः शतभृष्टिरसि वानस्पत्यो द्विषतो वधः। अप
उपस्पृश्य शिष्टं दर्भं वेदिस्थं तृतीयस्तागे उदगग्रं निदधाति। पृथिव्यै वर्मोसि वर्म यज
मानाय भव। दर्भमूले स्फ्येन संहंति। पृथिवि देवयजन्योषध्यास्ते मूलं मा हिंसिषं।
अप उपस्पृश्य मृदा सहस्फ्यमादत्ते। अपहतोररुः पृथिव्यै। मृदं हरति। व्रजं गच्छ गोस्था
नं वेदिमवेक्षते। वर्षतु ते द्यौः। मृदमुत्करे निवपति उत्करः प्रणीता पश्चिमदेशे बधान दे
व सवितः परमस्यां परावति शतेन पाशैर्योस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक्।
आग्नीध्रः उत्करदेशे उपविश्य पाणिभ्यां मृदं गृह्णाति। पुनः स्फ्येन प्रहरति। पृथिवि देव०।

=छिन्नेपि च तथा लूने सान्नाय्ये मार्तिके तथा। पश्चान्मंत्राः प्रयोक्तव्या मंत्रा यज्ञार्थसाधका
दृतिलिंगाक्षिः आहृतं वा यज्ञपाकरोतीति भरद्वाजसूत्रे लिंगं=

य दर्शपूर्ण० सिषं। अपहतपरक्ष इत्य स्फ्दा सदस्फ्यमादत्ते। अपहतो रक्षः पृथिव्यै देवयजन्यै। स्फ्दं ह
रति। व्रजं गच्छ गोस्थानं वेदिमवेक्षते। वर्षतु ते द्यौः स्फ्दमुत्करे निवपति। बधान देव
६ सवितः परमस्यां परावति शतेन पाशैर्योस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक्। पुनः
स्फ्येन प्रहरति। पृथिविदे० सिषं। अपहतपरक्ष इत्य स्फ्यमादत्ते। अपहतो रक्षः पृथिव्या आ
देवयजं वः हरति। व्रजं गच्छ गोस्थानं। वेदिमवेक्षते। वर्षतु ते द्यौः स्फ्दमुत्करे निवपति।
बधान देव० मतो मा मौग स्तृतस्ते दिवं मास्कान्। तूष्णीं च तुर्थं स्फ्यप्रहरणादिस्तृन्निवपनो
तं सह बर्हिषा। एवं परिग्राहं परिगृह्णाति। दक्षिणेन समारभ्य दक्षिणश्रोणिपर्यंतं स्फ्ये
न लेखामालिखति। वसवस्त्वा परिगृह्णंतु गायत्रेण छंदसा। दक्षिणश्रोणिमारभ्यो
त्तरश्रोणिपर्यंतं। रुद्रास्त्वा परिगृह्णंतु त्रैष्टुभेन छंदसा। अपहतपरक्ष्य। उत्तरश्रोणिमा
रभ्योत्तरांसपर्यंतं। आदित्यास्त्वा परिगृह्णंतु जागतेन छंदसा। करणं जपति। इमां ६
नराकृणुत वेदिमित्यवस्क मतीं० रुद्रवतीमादित्यवतीं वर्ष्मं दिवो नाभा पृथिव्या य
न्

परिस्तरेन क्रम हस्व तुल्य राशीयद्व परिस्तीर्णो भवति = ५ [illegible]

आयं यजमानो नरिष्येत्। वेदिं प्राचीमिरु ह्वन्ति दिवस्य त्वा सवितुः सवेकर्ने हणवंति वेधसः।
प्रेष्यति। अग्नीदित्यग्नि हर। आग्नीध्र उद्धतदेशाग्निं स्फद्सदुद्धत्यो त्करे निवतिपे॥ ॥
दुत्या न्वाधानं॥ ततो दर्शे पिराह्वे पिंडपितृयज्ञः॥ ॥अध्वर्युः प्रतिपदि प्रातर्के तेग्नि
होत्रे उत्तरेणाहवनीयं तिष्ठन्हस्तौ संस्पृशति उत्तरेण गार्हपत्यं वा। पश्चात्यवक्रे रुद्रगेव
तिष्ठन्पाणिन्द्रशेस्त्वं वहविभुजो वा० कर्मणे वां देवेभ्यः शकेयं। अपहतपरक्ष्य० आहवनी
यं परिस्तीर्णनीयं दर्भैः परिस्तरणाति। पुरस्तादुदगग्रैर्दक्षिणतः प्रागपरदर्भौ पारिस्रागग्रैः
पश्चादुदगग्रैरुत्तरतः प्रागपरदर्भाधः प्रागग्रैरेवं दक्षिणाग्निमेवं गार्हपत्यं। पत्नीहोत्र्ल
उत्तरतो वा यजमान प्रणीताग्नीध्रांस्थानेदर्भै रासनानि प्रकल्प्या ग्रेण गार्हपत्यं दर्भान्स्तृणीयेलु
दुहद्दंस्यं चिप्रक्षालिता नियत्पात्राणि सादयति। उत्तरतो वा। स्फ्यं कपालान्यग्निहोत्र
हवणीं० शूर्पं कृष्णाजिनं० शम्यामुलूखलं मुसलं दृषदमुपलां० [illegible] स्रुवं स्रुचं ध्रु
वां प्राशित्रहरणमिडापात्रं मेक्षणं पिष्टोद्वपनी प्रणीताप्रणयनमाज्यस्थालीं वेदं दारुपा
=८ दक्षिणेनाहवनीयं ब्रह्मायतनं० तमपरेण यजमानस्य० उत्तरेणाहवनीयं प्रणीताया: उत्तरश्रोणिमु

[illegible]

दर्शपूर्ण० नीयो ॠग्वेदपरिवासनं धृष्टिभिर्धर्मप्रवश्चनमन्वार्येख्याली मेदंनी वा। अन्यानि चायान्यपेक्षि
तानि तान्येवमेवासादयेत्। यजमानः। अस्मिन्कर्मणि ब्रह्माणं त्वामहं वृणे। ततो ब्रह्मा कृ
७ तपवनमंत्रा वमनमंत्रप्रोक्षणः प्रागुदगाहवनीयादवस्थायप्राङ्मुखो यज्ञोपवीत्याचम्य
दक्षिणाद्धिद्वारं प्रपद्येत पूर्वेणोत्करमपरेण प्रणीता इध्ममपरेण प्रणीते चात्वालं चा
त्वालवत्वेतत्तीर्थमित्याचक्षते। तीर्थेन प्रपद्य समस्तपाण्यंगुष्ठाग्रेणाहवनीयं परी
त्याहवनीयाद्दक्षिणतव्दक्षुस्वांगुष्ठोपकनिष्ठिकाभ्यां ब्रह्मासनात्तृणं प्रत्यग्दक्षिणा नि
रसेत्। निरस्तः परावसुः। अपउपस्पृश्य। इदमहमर्वावसोः सदने सीदामि। इत्युपविशे
द्दक्षिणोत्तरेणोपस्थेन। उपविश्य जपेत्। बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्प
ते यज्ञं गोपाय। उपविष्टे ब्रह्मणि यजमानः। भूपते भुवनपते महतो भूतस्य पते ब्रह्माणं
त्वा वृणीमहे वीतहव्ये पुरोहितं त्वया यं तु सामः स्वर्देवा। अंगिरसो हि वो। अध्वर्युः प्रष्या
स्तृणाति संततो गार्हपत्यादाहवनीयात्। वेदिमध्ये यज्ञस्य संततिरसि यज्ञस्य त्वा

संतत्यै स्तृणामि संतत्यै त्वा यज्ञस्य स्तृणामि। परिभोजनीयेभ्यो द्वौ दर्भौ प्रादेशमात्रौ सा
यावनखच्छिन्नौ भूमौ निधाय छिनत्ति। इमौ प्राणापानौ यज्ञस्यांगानि सर्वशः। आप्याययं
तौ संचरतां पवित्रे हव्यशोधने। पवित्रे अद्भिरनुमार्ष्टि। पवित्रे स्थो वैष्णव्यौ स्थो यद्धिये
स्थो वायुपूते स्थो। विष्णोर्मनसा पूते स्थो यज्ञस्य पवने स्थः। उत्तरेण गार्हपत्यमुपविश्य न ×पत्र ४
मसंयावति तस्मिंस्तिरः पवित्रमप आनयन्नाह। ब्रह्मन्नपः प्रणेष्यामि यजमानवा
चंयच्छ। ब्रह्मा। भूर्भुवः स्वर्बृहस्पतिप्रसूतः। इति जपित्वा। ओं प्रणय। वाचंयमो भव
तिरिति आतिसर्जनात्। अध्वर्युश्चमसं संपूरयित्वा नासिकासमं धृत्वा अस्कंदयन्नु
त्तरेणाहवनीयं दर्भेषु सादयति। पूर्णे वा त्वम् अनयापः प्रणयामि। पृथिवीं कर्णे ते
नध्यायेत्। दर्भैः प्रच्छाद्य पवित्रमादाय प्रदक्षिणं प्रत्यङ्ङित्य दक्षिणेनाग्निहोत्रह
वण्यांसव्येन स्फ्यमादत्ते। वेषाय त्वा। गार्हपत्ये प्रतितपति। प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः।

हित्वल्लौ। जघनेन गार्हपत्यमुदगग्रं स्फ्यं निधाय स्फ्ये विशिष्य पात्रीपात्र्यां पुरोडाशीयान्नोप्य
शूर्पे अग्निहोत्रहवणीं तस्यां पवित्रं निधाय स्रुग्घस्त एव पाण्याः धुरमभिमृशति। धूरसि धू

र्व धूर्वंतं धूर्व तं योस्मान्धूर्वति तं धूर्व यं वयं धूर्वामस्त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं
वह्नितमं देवहूतमम् अह्रुतमसि हविर्धानं दृꣳहस्व माह्वाः। पुरोडाशीयान्प्रेक्षते। मित्रस्य त्वा
चक्षुषा प्रेक्षे मा भेर्मा संविक्था मा त्वा हिꣳसिषं। तृणं स्त्रकं वा निरस्यति। उरु वाताय। अपउपस्पृ
श्य दशहोतारं व्याचष्टे। चित्तिः स्रुक्। चित्तमाज्यं। वाग्वेदिः। आधीतं बर्हिः। केतो अग्निः।
विज्ञातमग्निः। वाक्पतिर्होता। मन उपवक्ता। प्राणो हविः। सामाध्वर्युः। यजमान हविर्निर्व
प्स्यामि। यजमानः। ॐ निर्वप। अध्वर्युः पवित्रमत्यामग्निहोत्रहवण्यां मुष्टिमात्रं निधाय
तया शूर्पे निर्वपति। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जु
ष्टं निर्वपामि। एवं त्रिः पंचावन्तिनां तु चियं तुष्णीं द्वित्वल्लौ त्रित्वल्लौ चतुर्थं। यजमानो निरु

प्यमाणमन्त्रयते। अग्निꣳ होतारमिह तꣳ हुवे देवान्यज्ञियानिह यान्हवामहे। आयंतु देवाः सुमनस्य
माना वियन्तु देवा हविषो मे अस्य। अध्वर्युः देवस्य० स्ताभ्यामग्नीषोमाभ्यां जुष्टं निर्वपामि।
यजमानानुमंत्रणं पूर्ववत्। देवस्य त्वा० हस्ताभ्यामिंद्राय वैमृधाय जुष्टं निर्वपामि। दर्शे। देवस्य त्वा०
स्ताभ्यामग्नये जुष्टं निर्वपामि। देवस्य त्वा० स्ताभ्यामिंद्राग्निभ्यां जुष्टं निर्वपामि। एवं वन्निर्वापा
नुमंत्रणं। निरुप्तानभिमृशति। इदं देवानां। अतिशिष्टान्। इदमु नः सह। एकीकरोति।
स्फात्यै त्वा नारात्यै। आहवनीयमीक्षते। स्ववरभिविख्येषं वैश्वानरं ज्योतिः। गृहानवीक्ष
ते। दृꣳहन्तां दुर्या द्यावापृथिव्योः। शूर्पमादायोत्तिष्ठति। उर्वंतरिक्षमन्विहि। उत्तरेण गा
र्हपत्यꣳ सादयति। आदित्यास्त्वोपस्थे सादयामि। गार्हपत्यमभिमंत्रयते। अग्ने हव्यꣳ
रक्षस्व। सम्भ्रकायामिवल्कचितिरः पवित्रमप आनीयोदीचीनाग्राभ्यां पवित्राभ्यां पर्वे उ
त्पुनाति। देवो वः सविता उत्पुनातु। अच्छिद्रेण पवित्रेण। वसोः सूर्यस्य रश्मिभिः। प्रोक्षणी
रादायोत्तिष्ठति। अथैना अप उन्नयन्नु चालयन्नाह आपो देवीरग्रेपुवो अग्रेगुवोऽग्र इम
य

दर्शे॰ यज्ञंनयताग्रेयज्ञपतिंधत्तयुष्मानिन्द्रोवृणीतवृत्रतूर्येयूयमिन्द्रमवृणीध्वंवृत्रतूर्ये।ता
भिरेवाद्भिस्ताएवप्रोक्षतित्रिः।प्रोक्षितास्थ।प्रोक्षितास्थ।प्रोक्षितास्थ।पुरोडाशीयान्प्रो
९ क्षति।देवस्यत्वास॰हस्ताभ्यामग्नयेवोजुष्टंप्रोक्षाम्यग्नीषोमाभ्यामिंद्रायवैमृधाय।
द्विरस्तस्ती।दर्शे।देवस्यत्वा॰हस्ताभ्यामग्नयेवोजुष्टंप्रोक्षामीन्द्राग्निभ्यां।।द्विरस्तस्तीपेपा
त्राण्युत्तानानिकृत्वप्रोक्षतिशुन्धध्वंदैव्यायकर्मणेदेवयज्यायै।द्विरस्तस्तंषी।गार्हपत्य
स्यपुरस्तात्प्रोक्षणीर्निधायकृष्णाजिनमध्वर्युर्वामादायापसव्यमाहृत्य।अवधूनोति।
अवधूतंरक्षोवधूताअरातयः।तत्सव्योत्तरलोमोपस्तृणाति।गार्हपत्यस्योत्त
रपुरस्तात्।अदित्यास्त्वगसिप्रतित्वापृथिवीवेत्तु।सव्येनअविसृजन्नेवैना।निकर्मा ९
णिदक्षिणेनकृष्णाजिनेअन्येसहैतेनवान्तानितस्मिन्नुलूखलंस्थापयति।अधिषवण
मसिवानस्पत्यंप्रतित्वादित्यास्त्वग्वेत्तु।तस्मिन्पुरोडाशीयानावपति।अग्नेस्तनूरसि
वाचोविसर्जनंदेववीतयेत्वागृह्णामि।पंचावत्तिनांपंचमुष्टीन्निर्वपेद्वृषदमुसलमवदधाति।

अद्रिरसिवानस्पत्यःसदिदंदेवेभ्योहव्यंसुशमिशमिष्व।हविष्कृन्नमाह्वयतित्रिः।हविष्कृदे
हि।हविष्कृदेहि।हविष्कृदेहि।उच्चैःसमाहंतवे।यजमानः।अस्मिन्कर्मणिआग्नीध्रंत्वामहं
वृणे।आग्नीध्रःकृतपवनमंत्रोवमनमंत्रप्रोक्षणआचम्यतीर्थेनप्रविश्योत्तरेणगार्हपत्यमुप
विश्यइडादेवहूरित्यनुवाकंजपित्वाशम्यामादायदृषदंसहृदुपलांसमाहंति।इषमावदो
र्जमावदद्युमद्वदतवयंसंघातंजेष्म।एवंत्रिः।तूष्णींमान्याणिसमाहंति।अध्वर्युःपुरोडाशी
यान्वितुषान्कृत्वोत्तरतःअत्र्येतुपयस्यति।वर्षवृद्धमसि।तस्मिन्पुरोडाशीयानुद्वपति।प्रतित्वा
वर्षवृद्धंवेत्तु।उदग्रहृत्यपरापुनाति।परापूतंरक्षःपरापूताअरातयः।सव्यहस्तेनतु
षान्वायव्यांदिशिनिरस्यति।निर्ऋत्यांवा।रक्षसांभागोसि।अपउपस्पृश्यव्रीहितंडुलान्वि
विनक्ति।वायुर्वोविविनक्तु।पात्र्यांतंडुलान्प्रस्कंदयति।देवोवःसविताहिरण्यपाणिःप्रति
गृह्णातु।एवंकृतान्व्रीहीन्नवहन्यात्प्रयच्छन्नाह।त्रिष्फलीकर्तवैत्रिष्फलीकृता।नेष्ट्र
नाव।पत्नीत्रिर्वितुषान्कृत्वा।त्रिष्फलीकृताइत्याह।अध्वर्युस्तंडुलप्रक्षालनजलमंतर्वेदि

दर्शपूर्ण० प्राशित्रेण निनयति। निष्कलीक्रियमाणानां यो न्यंगो अवशिष्यते। रक्षसां भागधेयमापस्तत्प्र
वहतादिति स्वाहा। यजमानः रक्षोभ्य इदं। उत्तानवपः स्फ्यप्रतः। वानं विस्तर्जयन्नयोगमंत्रं जपति।
१० कस्त्वा युनक्ति स त्वा युनक्तु। अध्वर्युस्तथैव कृष्णाजिनमवधूनोति। अवधूतं॰ रक्षोवधूता अ
रातयः। तथैव स्तृणाति। आदित्यास्त्वगसि प्रति त्वा पृथिवी वेत्तु। तस्मिन्नुदीचीनकुंबां श
म्यां निदधाति। दिवः स्कंभनिरसि प्रति त्वादित्यास्त्वग्वेत्तु। तस्यां प्रागायतां दृषदं निदधाति। धि
षणासि पार्वत्या प्रति त्वा दिवः स्कंभनिर्वेत्तु। दृषदुपलां तिरश्चीं॰ सादयति। धिषणासि पार्व
तेयी प्रति त्वा पर्वतिर्वेत्तु। तस्यां पुरोडाशीयाननवपति। देवस्य त्वा॰ हस्ताभ्यामग्नये जुष्टमधि
वपामींद्राग्निभ्यां। न्यग्नीषोमाभ्यामिंद्राय वैमृधाय। दर्शे। देवस्य त्वा॰ हस्ताभ्यामग्नयेमं १०
जुष्टमधिवपामींद्राग्निभ्यां। अभिमृश्य जपति। ब्रह्मा अधिवपनाद्यावेयमन आकपालो
पधानात्। धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिं धिनुहि मां यज्ञनियं।
पिनष्टि। प्राचीं प्रोहति। प्राणाय त्वा। प्रतीचीं। अपानाय त्वा। तिरश्चीं कर्षति। व्यानाय त्वा। सो

पादस्तकृत्वीक्षते। दीर्घामनुप्रसितिमायुषे धां। कृष्णाजिने पिष्टानि प्रस्कंदयति। देवो वः सविता हि
रण्यपाणिः प्रतिगृह्णातु। हविः पत्न्यै प्रयच्छन्नाह। असंवपंती पिं॰ षाण्वहनि कुरुतात्। सा पिनष्टि।
अध्वर्युः प्रक्षालितानि कपालानि पश्चाद्गार्हपत्यस्याष्टौ दक्षिणत एकादश उत्तरतः पौर्णमास्यां
पुनरेवमेकादश उत्तरतः सादयित्वा धृष्टिमादत्ते। धृष्टिरसि ब्रह्म यच्छ। गार्हपत्यमभिमंत्रयते। अ
पाग्ने अग्निमामादं जहि। अंगारं दक्षिणतो निरस्यति। निष्क्रव्यादं॰ सेध। अप उपस्पृश्य॰ अन्यमं
गारं कपालोपधानस्थाने निदधाति। आ देवयजं वह। तदुपरि मध्यमं कपालं॰ स्थापयति। ध्रु
वमसि पृथिवीं दृं॰ हायुर्दृं॰ ह प्रजां दृं॰ ह सजातान्नस्मै यजमानाय पर्यूह। तदुपर्यंगारं॰ स्था
पयति। निर्दग्धं॰ रक्षो निर्दग्धा अरातयः। तत्पुरस्ताद्द्वितीयं निदधाति। धर्त्रमस्यंतरिक्षं दृं॰
ह प्राणं दृं॰ हापानं दृं॰ ह सजातानस्मै यजमानाय पर्यूह। तृतीयं पश्चात्। धरुणमसि दिवं दृं॰
ह चक्षुर्दृं॰ ह श्रोत्रं दृं॰ ह सजातानस्मै यजमानाय पर्यूह। दक्षिणतश्चतुर्थं। धर्मासि दिशो
दृं॰ ह योनिं दृं॰ ह प्रजां दृं॰ ह सजातानस्मै यजमानाय पर्यूह। दक्षिणस्यैव पुरस्तात्। चितस्थ

दर्शपूर्ण० प्रआमस्मै रयिमस्मैसजातानस्मैयजमानायपर्यूहा।दक्षिणस्यपश्चात्।चितस्थ० पर्यूहा।मध्यमस्योत्त
रतो द्वे सं॰स्पृष्टे।पश्चात्सप्तमं।चितस्थ० पर्यूहा।तत्पुरस्तात्तथैवाष्टमं।चितस्थ० पर्यूहा।कपालान्यं
११ गारैरुद्यापयति।भृगूणामंगिरसां तपसा तप्यध्वं।अभिमंत्रयते यजमानश्च।यानि घर्मे कपाला
न्युपचिन्वंति वेधसः।इत्युक्तान्यपि अतद्द्वितीयं कृत्वा।एवमुत्तरे एकादशा आदेवयजं वहे
त्यादि।तेषष्टीप्राग्वत्।नवमादित्रीणि वायव्यतआरभ्योत्तरतःप्राक्संस्थानि प्रत्येकं चितस्थे
मंत्रेण समानं।भृगूणा० प्यध्वं।यानि घर्मे० युंक्ता।पौर्णमासेष्ट्यां वैमृधार्थं तदुत्तरतः पुनरेव
मेकादशोत्तरतःकपालान्यासाद्यगार्हपत्ये पात्रीमदंतीं वाधिश्रित्य तत्तायां पिष्टाद्वपन्यांस
व्येनतिरःपवित्रं धृत्वा वाचं यमःकृत्वा जिनासिष्टानिसंवपति।देवस्य त्वा सवि० हस्ताभ्याम
ग्नये जुष्टं॰ संवपाम्यग्नीषोमाभ्यामिंद्राय वैमृधाय।ब्रह्मासंवपनप्रभृति वेदाभिवासनांतं ११
वाग्यतः।दर्शे।देवस्य० हस्ताभ्यामग्नये जुष्टं॰ संवपामींद्राग्निभ्यां।स्फ्यं ते आह।आहराप
आनय।आग्नीध्रःप्रणीताभ्यः स्रुवेण पात्रांतरे जलं गृहीत्वा वेदं पाणिं वाधः कृत्वा एवं मदं

तीजलमादाय उभयेत्यग्रपरिशिष्टे प्रक्षिपेत्।तदध्वर्युरनुमंत्रयेत।समापो अद्भिरग्मत समोषध
योरसेन सं॰रेवतीर्जगतीभिर्मधुमतीभिःसृज्यध्वं।अध्वर्युःपात्रीमधःकृत्वा मदंतीजलेन पि
ष्टान्याप्लावयति।अद्भ्यःपरिप्रजाताःस्थ समद्भिःपृच्यध्वं।मेक्षणेनभिश्रयति।जनयत्यै त्वा सं
यौमि।पृथग्भागान्कृत्वाभिमृशति।अग्नये त्वा।अग्नीषोमाभ्यां त्वा।इंद्राय वैमृधाय त्वा।दर्शे।
अग्नये त्वा।इंद्राग्निभ्यां त्वा।कूर्माकारं पुरोडाशं करोति।मखस्य शिरोसि।दक्षिणकपालां
गारान्यध्यूह्य तेषु पुरोडाशं स्थापयति।घर्मोसि विश्वायुः।सर्वाणि कपालानि स्पृशति।य ६
उरुप्रथस्वोरुतेयज्ञपतिःप्रथतां।तदुत्तरत आज्यस्थाल्यां निरःपवित्रं धृत्वाऽज्यं नि
र्वपति।ऊपांशुया।अस्य चक्षुषा द्रव्यास्तत्क्षीनि वेत्तव्या।अमदीनां पयोस्योषधीनां॰
रसस्तस्य ते क्षीयमाणस्य निर्वपामि देवयज्यायै।गार्हपत्याद् उत्तरतो सत्त्वामिश्रांगारान्नि
रूह्य तेष्वाज्यमधिश्रित्य तर्थे वोत्तरतःकपालेषूत्तरं पुरोडाशं कृत्वा स्थापयति।मखस्याशि
रोसि।घर्मोसि विश्वायुः।उरुप्रथस्वोरुतेयज्ञपतिःप्रथतां।एवं द्वितीयं।मख०घर्मोसि०उरुप्र०

दर्शपूर्ण० पात्र्यां जलं प्रक्षिप्य तेन जलेन पुरोडाशस्य लवं याहयति त्रिः। त्वचं गृह्णीष्व। त्वचं गृह्णीष्व। त
वचं गृह्णीष्व। एवं सर्वेषां। सर्वो न्पर्यग्निं करोति। अंतरितं रक्षो न्तरिता अरातयः। द्विरल्ल
१२ ह्ली। दक्षिणं पुरोडाशं श्रपयति। श्रपणमिहद्दर्भैरभिज्वलनं देवस्त्वा सविता श्रपयतु वर्षिष्ठे
अधि नाके। अग्निस्ते तनुवं मातिधाक्। गार्हपत्यमभिमंत्रयते। अग्ने हव्यं रक्षस्व। एवमुत्तरो
त्तरस्मिन्। अभिवास्य सांगारं भस्म वेदेन पुरोडाशौ परिप्रक्षिपति त्रिः भस्माभिवासनम
दाहार्थं। सं ब्रह्मणा पृच्यस्व। सं ब्रह्मणा पृच्यस्व। सं ब्रह्मणा पृच्यस्व। एवं द्वयोरपि। प्रेष्य
ति। अविदहंतः श्रपयत। वाचं विसृज्य पात्रीसंक्षालनोदकं गार्हपत्यादुल्मुकेनाभितप्तं
अंतर्वेदि स्फ्येन प्राचीस्तिस्रो रेखाः कृत्वा प्रत्यक् त्रिर्निनयति। एकताय स्वाहा। एकतायेदं प्रथमं। द्वितायस्वाहा। द्वितायेदं। त्रितायस्वाहा। त्रितायेदं। अध्वर्युर्वेदमादत्ते। अयं वे १२
दः पृथिवीमित्यादि। अग्नीदि तस्मिन्हरेत्यंतं प्रागुक्तं पौर्णमास्यामिदानीमेव कुर्यात्। आ
ग्नीध्राग्निमिद्दिहितायां संप्रेषमाह। ब्रह्मन्नुत्तरं परिग्राहं परिग्रहीष्यामि। ब्रह्मा। भूर्भु

वः स्वः बृहस्पतिर्ब्रह्मेति जपित्वा। ओं परिगृहाण। इत्यतिसृजेत। अध्वर्युर्दक्षिणां समारभ्य दक्षिणश्रोणि
पर्यंतं स्फ्येन स्पृशति। ऋतमसि। दक्षिणश्रोणिमारभ्योत्तरश्रोणिः। ऋतसदनमसि। उत्तरश्रोणिमारभ्योत्तरां
सपर्यंतं। ऋतश्रीरसि। वेदाग्रमुद्गमानीय प्राचीमारभ्य प्रत्यगपवर्गं स्फ्येन समीकरोति। धा असि स्वधा असि उ
र्वी चासि वस्वी चासि पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीरदानुर्यामैरयंश्चंद्रमसि स्वधाभिस्तां
धीरासो अनुदृश्य यजंते। वेदेः पश्चिमतस्तीर्य स्फ्याग्रपर्वाधोत्तरः श्री लेखा। मालिख्य तिर्यंचं स्फ्यं धारय
न्संप्रेषमाह। प्रोक्षणीरासादय इध्मा बर्हिरुपसादय स्रुवं च स्रुचश्च संमृड्ढि पत्नीं संनह्य आज्येनोदेहि। आ
ग्नीध्रः प्रोक्षणीरभिपूर्याध्वर्यवे प्रयच्छति। अध्वर्युः स्फ्योपरि किंचिन्निनीय रेखायां प्रोक्षणीरासाद्य उत्क
रे स्फ्यमुद्दकं स्यति। यो मा हृदा मनसा यश्च वाचा यो ब्रह्मणा कर्मणा द्वेष्टि देवाः। यः श्रुतेन हृदये नेच्छ
तावयस्यैंद्र वज्रेण शिरश्छिनद्मि। हस्तौ प्रक्षाल्य स्फ्यं च प्रक्षालयति। आग्नीध्रः प्रणीतोत्तरतः प्रागग्र
मिध्मं तदुत्तरतो बर्हिर्निधाय प्रदक्षिणमेत्य — इत्यदक्षिणस्ते हे नस्रुवं जुहूपभृतौ सव्येन ध्रुवां प्रा
शित्रहरणं वेदपरिवासनानि चादाय कृगपद्माहं पत्न्ये प्रतितपति। प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो नि

यजुर्दर्शपू० वेत्तेजिघ्रेन तेजसा निष्टपामि। द्वितल्प्यौ। वेदतृणैर्दक्षिणहस्तवेष्टितैः संमार्ष्टि। स्रुवं। गोषं मा निर्म्रक्षं वाजि
नं त्वा सपत्नसाहꣳ संमार्ज्मि। अग्ने बिलं बिलं मध्यतः प्रागपवर्गं त्रिरुत्स्यात्संबाह्यतः पात्रं पल्यं बाह्यतो
१२ प्रत्यगपवर्गं त्रिर्मूले दंडꣳ संमृज्य जोधः प्रत्यगारभ्योपरि प्रागपवर्गं कुशाग्रैः सꣳस्पृश्य प्रतितप्य परि
कर्मिणे प्रयच्छति। क दं। वामं प्राणं मा निर्म्रक्षं वाजिनीं त्वा सपत्नसाहीꣳ संमार्ज्मि। स्रुवं वत्। उपभृतं। वक्षः
श्रोत्रं मा निर्म्र [illegible] साहीꣳ संमार्ज्मि। ध्रुवां। प्रजां योनिं मा निर्म्रक्षं वाजिनी० मार्ज्मि। प्राशित्रह
रणं। रूपं वर्णं पशुस्यो मा [illegible] वाजिं त्वा सपत्नसाहि संमार्ज्मि। तल्पौ वा। संमार्गतृणान्यद्भिः सꣳस्पृश्य
गार्हपत्य उत्करे वानुप्रहरति। दिवः शिल्पमवततं पृथिव्याः ककुभिः श्रितं। तेन वयꣳ सहस्रवल्शेन
सपत्नं नाशयामसि स्वाहा। प्रजापतय इदं। उत्करे निधाय पक्षे स्वाहाकारवर्जं दर्शपूर्णमासयोः प्र
हारः विकृतौ निरासः। दूरं कश्चित्स्रुगग्रेणोत्करं तृणानि सꣳस्तीर्य तेषु स्रुवादीनासादयति। पत्नीं क १३
फलकरयोर्मध्येन प्रपाद्य गार्हपत्यस्य प्रत्यग्दक्षिणत उदीचीमूर्ध्वज्ञां [illegible] णा संनह्य
ति। बद्धपत्नीत्वे एकैकामेवासां संनह्येदेकैकां गार्हपत्यम [illegible] तकृद्धी
X

=२ नुक्रुपेवस्रयोक्रे=२ क्षयेदेकैका
मा ज्यमवेक्ष्ययेत्। =१

आशासाना सौमनसं प्रजाꣳ सौभाग्यं तनूं। अग्नेरनुव्रता भूत्वा संनह्ये सुकृताय कं। पत्नी वाचयति। य
त्कं क्रियाता आशीः कामेयुज्याते। पत्नी शिरः पवित्रमपआनामयति। पृथः स्तवीरोꣳ सꣳ हरत। द्वितल्प्यौ।
गार्हपत्यपरिषिच्य समिधमाधापयति। अग्ने व्रतपते व्रतं० अग्नये व्रतपतय इदं। वायो व्रतपते० आ
दित्य व्रत० व्रतानां व्रतप०। पुनः परिषिंचति। पत्नी गार्हपत्यस्य पश्चादासना तृणं निरस्य प्राङ्मुखी उप
विश्य जपति। सुप्रजसस्त्वा वयꣳ सुपत्नी रुपसेदिम। अग्ने सपत्नदंभनमदब्धासो अदाभ्यं। इदं हाणी
वाविधवा भूयासमदितिरिव सुपुत्रा। अस्थूरित्वा गार्हपत्योपनिषदे सुप्रजास्त्वाय। मम पुत्राः श
त्रुहणोथो मे दुहिता विराट्। उताहमस्मि संजया पत्युर्मे श्लोक उत्तमः। उं नेति रिक्तं धीयाते। तां गार्ह
पत्यमीक्षयति। अग्ने गृहपत उपमा ह्वयस्व देवानां पत्नीरुपमा ह्वयध्वं पत्निपत्न्येष ते लोको नम
स्ते अस्तु मा मा हिꣳसीः। ता मा ज्यमवेक्षयति। महीनां पयोस्योषधीनाꣳ रसोदब्धेन त्वा चक्षुषावेक्षे
सुप्रजास्त्वाय। आज्यस्थालीं गार्हपत्येधिश्रयति। तेजोसि। आज्यस्थाल्या अधस्तात्समिधं कु
त्वा प्राङुद्धरति। तेजोनुप्रेहि। आहवनीयेधिश्रयति। अग्निस्ते तेजो मा विनैत्। समिधमाहवनीये
पत्न्यामविद्यमानायं त्वायतनमासीनो यजमान एवैतान्निगदेत्। पत्नीसंयोजकाः स्वल्वेते दृष्टार्थाः। तस्यामवि
द्यमानायं नैव नाद्रियेद्॥

अग्नयइदं

यज्ञचैर्णदर्शे० भ्या दधाति। स्वाहा। एतदाज्यमग्रेण प्रोक्षणीः पर्योह्त्य प्रोक्षणीसमं रेखायां वेद्यां दक्षिणतो निदधाति।
यजमानोक्षिणी पूर्वं निमिल्यावेक्षते। आज्यमसि सत्यमसि सत्यस्याध्यक्षमसि हविरसि वैश्वानरं वैश्व
१४ देवमुत्पूतशुष्मं सत्यौजाः सहोसि सहमानमसि सहस्वारातीः सहस्वारातीयतः सहस्व पृतनाः स
हस्व पृतन्यतः। सहस्रवीर्यमसि तन्मा जिन्व। आज्यस्याज्यमसि सत्यस्य सत्यमसि सत्यायुरसि सत्य
शुष्ममसि सत्येन त्वाभिघारयामि तस्य ते भक्षीय। अध्वर्युराज्यं यथाहृतं पर्याहृत्य वेद्युत्तरार्धे स्फ्य
स्य वर्त्मनि निधायावेक्षते। अग्नेर्जिह्वासि सुभूर्देवानां धाम्नेधाम्ने देवेभ्यो यजुषे यजुषे भव। आज्य
मुदीचीनाग्राभ्यां पवित्राभ्यामात्मनः सकाशात्पुरस्तान्नीत्वा पुनरात्माभिमुखं नयन् त्रिरुत्पुना
ति। शुक्रमसि० प्रथमं। ज्योतिरसि। द्वितीयं। तेजोसि। तृतीयं। प्रोक्षणीरप्युनरादाय तेन च उत्पुनाति। १४
देवो वः सविता पुनातु अच्छिद्रेण पवित्रेण। वसोः सूर्यस्य रश्मिभिः। प्रोक्षणीषु पवित्रे निधाय दक्षि
णेन हस्तेन सव्येन च ध्रुवामादाय तां वेदे निधाय तस्यां मन्त्रावृत्या चतुराज्यं गृह्णाति। शुक्रं त्वा शुक्रा
यां धाम्ने धाम्ने देवेभ्यो यजुषे यजुषे गृह्णामि। गृहीतं गृहीतं यजमानो नुमन्त्रयते। पंचानां त्वा वातानां
यंत्राय धर्त्राय गृह्णामि। प्रथमं। पंचानां त्वर्तूनां यंत्राय धात्राय गृह्णामि। २। पंचानां त्वा दिशां यंत्राय ध०३

=३ ब्रह्माप्याज्यग्रहणप्रभृति वाग्यमो भवत्या स्रुक्संसादनात्। =३

१ दक्षिणतो यजमानायवा

पंचानां त्वा पंचजनानां यंत्रा०४। अध्वर्युश्चतुर्गृहीतमाज्यं ध्रुवं संमृज्य परिकर्मिणे प्रयच्छति। द्वेधा बर्हिषोः प्र
स्तरे दधाति नीलके। अध्वर्युरुपभृतमादाय तां वेदे निधाय मंत्रावृत्या पूर्ववच्चतुर्गृहीतादल्पशोऽष्टकृत्वो गृ
ह्णाति। ज्योतिस्त्वा ज्योतिषि धाम्ने धाम्ने देवेभ्यो यजुषे यजुषे गृह्णामि। यजमानः प्रतिग्रहणमनुमन्त्रयते।
चरोस्त्वा पंचबिलस्य यंत्राय धर्त्राय गृह्णामि। १। ब्रह्मणस्त्वा तेजसे यंत्राय०मि। २। क्षत्रस्य त्वौजसे यंत्राय०३
विश्वे त्वा यंत्राय०। ४। सुवीर्याय त्वा गृ०। ५। सुप्रजास्त्वाय त्वा गृ०। ६। रायस्पोषाय त्वा गृ०। ७। ब्रह्मवर्चसाय
त्वा गृ०। ८। ध्रुववत् संमृज्य परिकर्मिणे प्रयच्छति सोप्युत्तरेण सादयति। ध्रुवायां पूर्ववच्चतुर्गृह्णा
ति। अर्चिस्त्वार्चिषि धाम्ने धाम्ने देवेभ्यो यजुषे यजुषे गृह्णामि। यजमानः प्रतिग्रहणमनुमन्त्रयते।
भूरस्माकं। हविर्देवानां। आशिषो यजमानस्य। ३। देवानां त्वा देवेभ्यो गृह्णामि। ४। अध्वर्युस्तत्स्थाली
मभिपूरयति। यजमानः। कामाय त्वा गृह्णामि। पूर्ववत् संमृज्य परिकर्मिणे ददाति स पूर्ववत्सादयति।
अध्वर्युः सस्रुवमाज्यस्थालीं वेदेः पश्चान्निधाय प्रोक्षणीरुपोत्तिष्ठति। आपो देवीर०ताभिरं भि३
वाङ्गिरस्त्वा वैश्वदेवं प्रोक्षामि त्रिः। प्रोक्षितास्थ। प्रोक्षितास्थ। प्रोक्षितास्थ। इध्मं त्रिः स्वयं त्रिः सकृद्द्विः प्रोक्षति।

प्राचीनावीतेवा ५

यजुर्दर्शपूर्ण॰ कृष्णोस्याखरेष्ठो ऽग्नये त्वा स्वाहा। वेदिं प्रोक्षति। वेदिरसि बर्हिषे त्वा स्वाहा। बर्हिः प्रोक्षति। बर्हिरसि स्रुग्भ्य
स्त्वा स्वाहा। बर्हिरग्रेणेध्मप्रणीताहवनीययोर्मध्येन प्राङ् नीत्वा वेदिं पुरोग्रन्थि ऊर्ध्वाग्रं ⁻ पनिधत्ते
१५ ग्राणि प्रोक्षति। अन्तरिक्षाय त्वा। प्रकीर्णमध्यानि। आसीनो मूलानि। पृथिव्यै त्वा। प्रोक्षणीपुष्करस्याधस्ता
त्पाणि समाधाय कृत्वा प्रत्यङ्मुखाभ्यां करपाणिभ्यां ग्रन्थिमासिच्य शिष्टं जलं दक्षिणां श्रोणिमारभ्योत्तर
श्रोणिपर्यन्तं निनयति। स्वधा पितृभ्य ऊर्ग्भव बर्हिषद्भ्य ऊर्जा पृथिवीं गच्छत। पितृभ्यो बर्हिषद्भ्य इदं।
उभावपः स्पृशतः। अध्वर्युरग्निहोत्रहवणीमात्मनः पश्चान्निरस्याप उपस्पृश्य बर्हिर्विस्रस्याप उ
पस्पृश्य प्रथमं प्रस्तरं गृह्णाति। विष्णोः स्तूपोसि। उदगग्रौ प्रस्तरे पवित्रे आनयति। यजमाने प्राणापा
नौ दधामि। प्रस्तरमग्रेणाहवनीयं यजमानाय ब्रह्मणे वा दत्त्वा बर्हिः संनहनं विस्रस्य दक्षिणाश्रो
णिमारभ्योत्तरां पर्यन्तं निधाय बर्हिर्मुष्टिं प्रागग्रमुदक्संस्थं स्तृणाति। देवबर्हिरूर्णम्रदसं त्वास्तृ १५
णामि स्वासस्थं देवेभ्यः। प्रथमं। एवं द्वितीयं। तृतीयं। प्रग्वेदिं प्रागास्तृतदर्भमूलानि च प्रच्छाद
यन्। पुनः प्रस्तरं गृहीत्वा प्राङ् भिरप्यप्रास्तरपाणिरुदगग्रं मध्यमं परिधिं परिदधाति। गन्धर्वोसि

=१ बर्हिरतीत्ययथा वेदिर्न दृश्येत तथास्तरणीयात् =१

=१० बर्हिरिध्मप्रणीतयोर्मध्येन प्राङ्नीत्वा प्रणीताहवनीययोर्मध्येन पुनराहृत्यान्तर्वेदिं =१०

=२ परिधीन्न संस्पृष्टान्वा प[illegible]ध्यात् =२

विश्वावसुर्विश्वस्मादीषतो यजमानस्य परिधिरिड ईडितः। यजमानः। ध्रुवोसि ध्रुवोहं सजातेषु
भूयासं धीरश्चेत्ता वसुवित्। तत्स्मलोपरि प्रागग्रं दक्षिणं। इन्द्रस्य बाहुरसि दक्षिणो यजमानस्य
परि॰ इडितः। यज॰। उग्रोस्युग्रोहं सजातेषु भूयासमुग्रश्चेत्ता वसुवित्। अध्वर्युर्मध्यमाग्रस्या
धस्तात्प्रागग्रमुत्तरं। मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा यजमानस्य परिधिरिड ईडितः।
यजमानः। अभिभूरस्यभिभूरहं सजातेषु भूयासमभिभूश्चेत्ता वसुवित्। सूर्यं पुरस्तात्म
नसा परिधिं कल्पयति। सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्याः। यजमानः। युनज्मि त्वा ब्र
ह्मणा दैव्येन हव्यायास्मै वोढवे जातवेदः। ऊर्ध्वे समिधावग्नावादधाति। वीतिहोत्रं त्वा कवे द्यु
मन्तं समिधीमह्यग्ने बृहन्तमध्वरे। इति दक्षिणां। तूष्णीमुत्तरां। यजमानोनुमन्त्रयते। इध्मा
नास्त्वा सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते। परिस्तरणीयस्यो दर्भद्वयमादाय वि
धृतिसंज्ञौ विन्ह मुदगग्रं निदधाति। विष्णोर्यन्त्रे स्थः। तदुपरि प्रागग्रं प्रस्तरं। वसूनां रुद्राणा

३-अनुपूर्वमेवैनाः सादयेत्-३

दर्शपूर्ण० १६

मादित्यानां सदसि सीद। प्रस्तरे कृत्वा। जुहूरसि घृताची नाम्ना प्रियेण नाम्ना प्रिये सदसि सीद। तं उत्तरतोऽधिवृत्योरधस्तादुपभृतं। उपभृदसि घृताची नाम्ना प्रियेण नाम्ना प्रिये सदसि सीद। तदुत्तरतो ध्रुवां। ध्रुवासि घृताची नाम्ना० सीद। पूर्वं पूर्वमनुत्तरमन्वुत्तरमुत्तरं सादयति। स्रुचः सहदेवाभिमृशति। एता असदन्सुकृतस्य लोके ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञनियं। तदुत्तरमाज्यस्थालीं स्रुवं तस्यां सादयित्वा सर्वाण्याज्यान्यभिमन्त्रयते। विष्णूनि स्थ वैष्णवानि धामानि स्थ प्राजापत्यानि। दक्षिणेनाज्यस्थालीं स्रुवं च सव्येन दारुपात्रीं वेदं चादाय प्रदक्षिणं प्रत्युदुत्य जघनेन गार्हपत्यमुपविश्य पाण्योः पुरोडाशसंख्यया मन्त्रावृत्तौ पत्नीते। स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः। घृष्टिमादाय दक्षिणपुरोडाशस्यांगारानपोहति। इदमहं सेनाया अभीत्वर्यै मुखमपोहामि। पुरोडाशं प्रकाशयति। सूर्यज्योतिर्विभाहि महते सौभगाय। घृष्टिं निधाय वेदेन विनजसं कृत्वाभिघारयति। आप्यायतां घृतयोनिरग्निर्हव्यानुमन्यतां। श्रीराम १६

५-प्रागायतायामुदगायतायां वा-५

५-केचिदग्नीषोमीयादीनां तूष्णीमभिघारणमिच्छन्ति प्रकृतावुक्ताभावात्-५

स्वमङ्ग त्वत्र संक्षरत्करूपंता वक्ष विदं पञ्चानां तेजसाग्नये जुष्टमभिघारयामि। पुरोडाशमुद्वास
यति। ऋत उद्वाति जनिता मतीनां। आज्येन संतर्पयति। आईः पृथस्तु भुवनस्य गोपाः। आज्या
क्तहस्तेनापर्यावर्तयन्पुरोडाशमधस्तादभ्यनक्ति। यस्त आत्मा पशुषु प्रविष्टस्तं संक्षव। पात्र्यां तूष्णीं
निधाय एवमेवोत्तरपुरोडाशस्यांगारानपोहति। इदमहं सेना० हामि। निदर्शयति। सूर्यज्यो०
याय। अभिघारयति। आप्यायतां० तेजसाग्नीषोमाभ्यां जुष्टमभिघारयामि। उद्वासयति।
ऋत० मतीनां। संतर्पयति। आई० गोपाः। अधस्तादभ्यनक्ति। यस्त आत्मा० संक्षव। पात्र्यां
निधाय। तृतीयं। इदमहं सेनाया इत्यादि तेजसेन्द्राय वैमृधाय जुष्टमिति विशेषः। शे
षं पूर्ववत्॥ दर्शे॥ द्वितीयं। आप्या० तेजसेन्द्राग्निभ्यां जुष्टमिति विशेषः॥ शेषं समाने॥
कपालानि सहृत्स्त्यैकंवानक्ति। धूरभ्रतिः पृथिव्यै रसो मा क्रमीत्। अष्टौ कपालानि
मन्व्ययो द्वासयति॥ यजमानश्च। यानि घर्मे कपालान्युपचिन्वन्ति वेधसः। पूष्णस्तान्य
भक्षाणां परिकपालानि विहितं वेद्या

अलंकरणे स्रुवेण सर्वत्राभिघारणं

दर्शपूर्ण० पित्रंतदूर्द्ध्वायत्विमुंचतां। एवमुत्तराण्येकादश। तदुत्तराणि च। स्रुवमभिपूर्य पुरोडाश
योर्मध्ये स्थापयित्वा सर्वाणि हवींष्यादाय तद्वेदिं स्रुचोपसृष्टा सादयति। यजमानश्च।
१७ भूर्भुवः स्वः। आज्यपूर्णं स्रुवमग्रेण स्रुचः पर्योहृस्य दक्षिणेन जुहूं प्रस्तरे सादयति।
स्योनो मे सीद सुषदः पृथिव्यां प्रथयि प्रजया पशुभिः सुवर्गे लोके दिवि सीद पृथिव्यामं
तरिक्षे इदमुत्तरो भूयासमधरे मत्सपत्नाः यथाहतमानिय ध्रुवायामवनयति। अप्सो
सिशा करो घृताची नाङ्गस्तु प्रियेण नाम्ना प्रिये सदसि सीद। यजमानो हवींष्य
नुमंत्रयते। यन्मे अग्ने अस्य यज्ञस्य रिष्याद्यद्वा स्कंदादाज्यस्योत विष्णो। तेनह १७
न्मि सपत्नं दुर्मरायुमैनं दधामि निर्ऋत्या उपस्थे। होतारं वृणीते। अस्मिन्कर्मणि
होतारं त्वामहं वृणे। होता वृतोस्मि भविष्यामि। अध्वर्युः होतरेहि। होता[illegible]

वनमंत्रान्वमनमंत्रप्रोक्षणः प्रागुदगाहवनीयो नीदवस्थापयमाच्छुस्तीयज्ञोपवीत्याचम्य द
क्षिणाद्वाहिर्द्वारं प्रपद्यते तीर्थेन प्रविशन्नध्वर्युराह। अध्वर्यो तेन मा चक्षुदेवताश्चनासो
चानुपूर्व्येणस्थ्रैरुपांशुयाजाय जमानस्य प्रवरं नक्षत्रनामधेयान्यनाश्च वैकल्पिकान्यदा
थो नः॥ अध्वर्युः॥ पौर्णमासं तंत्रं। वार्त्रघ्नावाज्यभागौ। अग्निः विष्णुः अग्नीषोमौ इं
द्रो वैमृधश्च प्रधानदेवताः। पंचप्रयाजाः त्रयोनुयाजाः सोमः त्वष्टा देवानां पत्न्यः
राका सीनीवाली कुहूः अनुमतिः अग्निर्गृहपतिश्चेत्येते पत्नीसंयाजाः। सामि
धेनीप्रभृत्याप्रयाजेभ्यः शंयुवाकादूर्ध्वं च मंद्रः स्वरः। प्रधानानां मध्यमः। शेषउत्त
५४ मः। उपांशु विष्णुपत्नीसंयाजाः। जपानुमंत्रणाप्यायनोपस्थाना निमंत्राश्च कर्मकरणाः
उपांशु॥ अयं यजमानः वैश्वामित्राघमर्षणकौशिकप्रवरः कृत्तिकाप्रथमो मार्गशीर्षे इति।
दर्शे। आमावास्यं तंत्रं। वृधन्वंतावाज्यभागौ। अग्निः विष्णुः इंद्राग्नी इति प्रधानदेवताः।

१= ब्रह्मासामि धेनी प्रस्थतिवा वंयम आ मयर वरणा त्वा=५

यजुर्दर्शे० इति विशेषः। शेषं समानं। तीर्थेन दक्षिणं पादं पुरः पुरो निधाय प्रपद्य वेदिश्रोण्यो नर
१८ यापो दक्षिण पादपार्ष्णि समां निधाय तस्या दाग्रेण बर्हि राक्रम्य सं हितौ सव्यं पादं बहि
र्वेदि निधाय संहितौ पाणी धारयन्नां का प्रावत्यंगु ली हृदय संमिता वंक संमितौ वा
द्यावापृथिव्योः संधि मीक्ष्यमाणस्ति ष्ठेत। अध्वर्यु रिध्मात् समिधमाददानं आह। अग्नये
समिध्यमानायानु ब्रूहि। होता प्रेषितो जपति। उपांशु। नमः प्रवक्त्रे नम उपद्रष्ट्रे न
मो नुख्यात्रे क इदमनु वक्ष्याति स इदमनु वक्ष्यति षण्मो वीरं हस्पातु द्यौश्च पृथिवी
चाहश्च रात्रिश्चाप श्चौ षध याश्च वा कृसमस्ति तय द्वः साधु तं दासि प्रपद्ये हमेवमां
हलशर्मोणां स्वं नामा दिष्ट्वा। भूते भविष्यति जाते जनिष्य माण आ अजाम्यपा व्यं १८
वाचो अशांतिं वहा। अत्र आगांनिं वहे स्कच्चारण काले दक्षिण करांगुल्यग्राण्य
हृष्य जातवेदो रमया पराहन्मथि। अत्रेपग्न्यायित्युच्चारण काले गुल्याग्राणि प्रति संदध्यात।
६= आमंत्रणानंतरं इध्ममभ्युज्य प्रविष्टे होतरि
आह= ७

वर्ममे द्यावापृथिवी वर्मो ग्निर्वर्मे स्य्सूर्यो वर्ममे संवु तिरश्विकाः। तद द्यवा वः प्रथमं मसी
यये नास्तरां अभि देवा असाम। उर्जो द उतयज्ञियासः पंचजनाः ममहोत्रं जुषध्वं।
इत्यपांशु जपित्वा हिं ३ उच्चैः। उपांशु भूर्भुवः स्वरोम्। प्र वो वाजा अभिद्यव इत्या
दिमं इर एक श्रुत्या। प्र वो वाजा अभि द्यवो हविष्मं तो घृता च्या देवान् जिगाति सुम्नयो ३
अभिद्यवो प्र वो वाजाँ हविष्मं तो घृता च्या। देवान्जिगाति सुम्नयो प्र वो वाजा अभिद्यवो हविष्मं
तो घृता च्या देवान्जिगाति सुम्नयो ३ प्र वो वाजा अभिद्यवो हविष्मं घृता च्या। अग्न आ
याहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हि षी ३ तं त्वा समिद्भिरंगिरो घृते
न वर्धयामसि। बृहच्छोचा यविष्ठ्यो ३ स नः पृथुश्रवाय्यमच्छा देव विवाससि। बृहद
ग्ने सुवीर्यो ३ मीळेन्यो नमस्यस्तिरस्तमांसि दर्शतः। समग्नि रिध्यते वृषो ३ वृषा
अग्निः समिध्यते श्वो न देववाहनः। तं हविष्मं तईळते। ३ वृषं वृषणं त्वा वयं वृषन्वृषणः

यद्वा दर्शपूर्ण॰ समिधीमहि। अग्नेदीद्यतं बृहो ३ मग्निं दूतं वृणीमहे होतारं विश्ववेदसं। अस्य यस्य
क्रतो ३ समिध्यमानो अध्वरेग्निः पावक ईड्यः। श्रौ॥ चिषे शस्तमीमहो ३ वृषं समि
१९ द्धो अग्न आहुत देवान्यक्षि स्वध्वर। त्वं हि हव्यवाळसीं॥ आ जुहोता दुवस्यताग्निं प्र
यत्यध्वरे वृणीध्वं हव्यवाहनो ३ मा। आ जुहोता दुवस्यताग्निं प्रयत्यध्वरे। वृणीध्वं हव्यवा
हनो॥ आ जुहोता दुवस्यताग्निं प्रयत्यध्वरे वृणीध्वं हव्यवाहनो ३ मग्ने महाँ ३ असि
ब्राह्मण भारत। वैश्वामित्रो अघमर्षण कौशिक। देवेद्धो मन्विद्ध ऋषिष्टुतो विप्रानुमदितः
कविशस्तो ब्रह्मसंशितो घृताहवनः प्रणी यज्ञानां रथीरध्वराणामतूर्तो होतात्व १९
र्णिर्हव्यवाट्। अवस्यति। सामिधेनीः एकश्रुति संततमनुब्रूयात्। त्रिः प्रथामुत्तमे
अन्वाहाध्यर्धकारं। प्रथमां सामिधेनीमनवानमनुब्रूयादन्वाह। उत्तमां उपोत्तमा
र्धसहितां द्विवारं पठित्वा ऽवसाय पुनः सार्धं पठित्वाग्ने महाँ ३ असीति निगां तेवस्येत्।

अवशिष्टा स्वर्धर्ध इं अवसाय प्रयाजेनोत्तरां संदध्यात्। जपादीनां चातुःस्वर्यं। अध्व
र्युः प्रवो वाजा अभिद्यव इत्यस्या उपक्रमकाले प्रथमां समिधमाधाय तत ऊर्ध्वं प्रणवे
प्रणवे द्वितीये। द्वे कादश समिधो भ्याधाय समिद्धो अग्न आहुते त्यस्याः प्रणवांते
तिस्रः सहाधाय एकां परिशिष्य। आ जुहोता दुवस्यते त्यस्या वा वनकाले वेदेन त्रिराह
वनीयस्योपरि वाजयति। यजमानः प्रथमसमिदाधानानंतरं। अग्न यद्दं। उद्बुधी
अग्ने यजमानार्थे धिनिध्म(?)मो अभिदासते। अग्ने देवेद्ध मन्विद्ध मंद्रजिह्व। अध्वर्यु
ब्राह्मण भारते त्यवसान काले स्रुवाज्यात् स्रुवेणोपहत्याधस्ताद्दंडं धृत्वा दक्षिणं परि
धिमारभ्योत्तरान्परिधेरासीनस्तिर्यंचमाघारमाघारयति। मनसा प्रजापतये स्वाहा।
यजमानः। आर्षेयान्प्रवृणानं होतारमनुमंत्रयते। अमर्त्यस्य ते होतर्मूर्धन्नाजिघ
र्मि रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय। आघारमाघार्येमामनुमंत्रयते। प्र

दर्शपूर्ण० जापतय इदं। मनो लिप्सा प्राजापत्यं मनसा मामन्त्रेनाविघ्ना। अध्वर्युरग्नीध्रं प्रेष्यति।
अग्नीदग्नीन् त्रिस्त्रिः संमृड्ढि। आग्नीध्र इध्मसंनहनैः स्फ्यमावेष्ट्य तेन मध्यमद
२० क्षिणोत्तरान्परिधीन्क्रमेणाग्निं त्रिस्त्रिः संमृज्याहवनीयं समार्ष्टि। अग्ने वाज
जिद्वाजं त्वाग्ने सरिष्यन्तं वाजं जेष्यन्तं वाजिनं वाजजितं वाजजित्यायै संमार्ज्म्यग्निम
न्नादमन्नाद्याय। अथ होता। आस्पात्रं जुहूर्देवानां चमसो देवपानोऽरां इवाग्ने नेमि
र्देवांस्त्वं परिभूरस्यावह देवान्यजमानाय। अग्निमग्न आवह। सोममावह। श्रीरामः
अग्निमावह। विष्णुं उपांशु उच्चैः आवह। अग्नीषोमावावह। इन्द्रं वैमृधमा
ऽवह। देवाँ आज्यपाँ आवह। अग्निं होत्रायावह स्वं महिमानमावह। आ २०
वह जातवेदः सुयजा यज। दर्शे। उपांशुयाजानन्तरं। इन्द्राग्नी आवह। देवाँ आ
ज्यपानित्यादि शेषं। इत्यावाह्य यथास्थितमूर्ध्वज्ञानुरुपविश्योदग्वेदेर्ध्वस्त्वणा।

नमः संबंधात् ५

निभूमौ प्रादेशं कुर्यात्। अदितिर्मोतास्यां तरिक्षान्मा छेत्सीरिदमहमग्निना देवेन देवत
यात्रिवृतास्तोमेन रथन्तरेण साम्ना गायत्रेण छन्दसाग्निष्टोमेन यज्ञेन वषट्कारेण वज्रे
णयोऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तं हन्मि। इति मन्त्रान्ते भूमौ प्रादेशं कुर्यात्। अध्वर्युरास्पा
त्रं जुहूरिति वचनकाले जुहूपभृतौ गृह्य ततः प्राञ्चमञ्जलिं करोति। भुवनमसि विप्रथस्वा
ग्ने यष्टरिदं नमः। दक्षिणहस्तेन जुहूमादत्ते। जुह्वेह्यग्निस्त्वा ह्वयति देवयज्यायै। स
व्येनोपभृतं। उपभृदेहि देवस्त्वा सविता ह्वयति देवयज्यायै। देवद्रोतानकाले स
व्यपादेन प्राड्क्रान्तो ग्रेण स्रुचौ वेदिमत्याक्रमं जपति। अग्नाविष्णू मा वामवक्रमिषं
विजिहाथां मा मा संताप्तं लोकं मे लोककृतौ कृणुतं। आहवनीयाद्दक्षिणतः स्था
नं कल्पयति। विष्णोः स्थानमसि। यजमानेन स्रुच्यन्वारब्धो मध्यमं परिधिं मध्यं जु
ह्वग्रेण संस्पृश्याच्छिन्नं प्राञ्चमाघारमाघारयति। इतदिंद्रो अकृणोद्वीर्याणि समा

रभ्यो श्रौ अध्वर्यो। दिविस्पृशमह्रुतोय ज्ञोयज्ञपतेरिंद्राय स्वाहा। ऊर्ध्वमुदन्नाति। इदमहं
यजमानः। इंद्रायेदं। वागस्यैंद्री सपत्नक्षयणी वाचा मेंद्रियेणाविश। अध्वर्युरस्पर्शयन्नग्नी
२९ दक्षिणेन पदा उदङ्ङुत्क्रमेण जपति। पाहि माग्ने दुश्चरितादा मा सुचरिते भज। ऊर्ध्वा ध्रुवां
त्रिः समनक्ति। मखस्य शिरोसि संज्योतिषा ज्योतिरंक्तां। हिंल्लंली। यथायतनं स्रुचौ सादयित्वा
स्फ्यमुत्करदेशे ऊर्ध्वाग्रं निहत्य स्फ्यं प्रगृह्य तत आग्नीध्रं कृत्वा प्रह्व ओं श्रावय इत्योंकारमाकारं च प्लाव
यन्। ओं श्रा ३ वय। आग्नीध्रः। अस्तु श्रौ ३ षट् ओंकारं प्लावयन्। अध्वर्युः। अग्निर्देवो
होता देवान्यक्षद्विद्वांश्चिकित्वान्मनुष्वद्भरतवत्कुशिकवदघमर्षणवद्विश्वामित्रवद्ब्रह्मण्व २९
देहवक्षद्ब्राह्मणा अस्य यज्ञस्य प्रावितारः इति यजमानप्रवरं ब्रूयात्। ऊत शर्मा मानुषः।
इति होता नो मग्रहीतात्। उत्तिष्ठतः। होता। आश्रावयिष्यंतमध्वर्युमनुमंत्रयते। आश्रा
वय यज्ञं देवेष्वाश्रावय मां मनुष्येषु कीर्त्यै यशसे ब्रह्मवर्चसाय। प्रवरान्प्रवृणानं होतारमनुमंत्रयते।

देव सवितरेतं त्वा वृणतेग्निं होत्राय सह पित्रा वैश्वानरेण द्यावापृथिवी मो मा तामग्निर्होताहं
मानुषः। अध्वर्यो मानुषद् इति शाहं श्रुत्वा। उदायुषा स्वायुषोदोषधीनां रसेनोत्पर्जन्यस्य धाम
भिरुदस्थाममृता ३ँ अनु। इत्युत्तिष्ठेत्। पश्चिमाध्वर्यो नवतिश्वपाशा अग्निं होतारमंतरावि
वृत्ताः। सिनेतिपाकमतिधीरएति। इत्यत्र छाय पठति। क तस्य पंथामन्वेमि होता। इत्याग्नीध्र
सहितमध्वर्युमभिक्रम्य अंसेध्वर्युमन्वारभे तपाश्वं संछिन्नपाणिनाग्नीध्रं सव्यपाणिना। ताहशे
न अंकेन वा। इदमन्वारभामहे होतृवूर्ये पुरोहितं। येनायन्नुत्तमं स्वर्देवा अंगिरसो दिवं।
संमार्गेत्तृणेष्विरभ्यात्मं मुखं संमृजीत। संमार्गोसि संमां सृजया पशुभिर्मे ड्डि। सहन्नं
त्रेण हिंल्लंली। अप उपस्पृश्याध्वर्युं विमुंचति। विमुक्तोध्वर्युः प्रसवमाकांक्षन्नास्ते। होता
होतृषदनात्स्वा साध्वमुखः स्थिता होतृषदनमभिमंत्रयते। अहे दैधिषव्योदतस्तिष्ठान्य
स्यसदने सीदयोस्मत्साकृतरः। अंगुष्ठोपकनिष्ठिकाभ्यां होतृषदनात्तृणं प्रत्यग्दक्षिणा निरस्येत्।

२ = निष्टन्नुपविश्य वास्ते आसस वा त प्रसवश्चघृतवती
जपः = २

दर्शपूर्ण० निरस्तः परावसुः। अप उपस्पृश्य। इदमहमर्वावसोः सदने सीदामि। इत्युपविश्य दक्षिणो
त्तरेणोपस्थेन। उपविश्य। देवबर्हिः स्वासस्थं त्वाध्यासदेयम्। इति पठति। अभिहितः प्रस्तरो बर्हि
२२ षद्भवा इति जानु शिरसा बर्हिरुपस्पृश्य। तदूर्ध्वं जपेत्। भूपतये नमो भुवनपतये नमो भू
तानां पतये नमो भूतये नमः। प्राणं प्रपद्ये अपानं प्रपद्ये व्यानं प्रपद्ये वाचं प्रपद्ये चक्षुः प्रपद्ये श्रो
त्रं प्रपद्ये मनः प्रपद्य आत्मानं प्रपद्ये गायत्रीं प्रपद्ये त्रिष्टुभं प्रपद्ये जगतीं प्रपद्येनुष्टुभं प्रपद्ये
बृहतीं प्रपद्ये स्वर्यो नो दिवस्पातु वातो अंतरिक्षात्। अग्निर्नः पार्थिवेभ्यः। नमो महद्भ्यो नमो श्रीरामशरणं
अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः। यजाम देवान्यदि शक्नवाम मा ज्यायसः शंस
मा वृक्षि देवाः। विश्वे देवाः शास्तन मा यथेह होता वृतो मनवै यं निषद्य। प्रमे ब्रूत भागधे २२
यं यथा वो येन पथा हव्यमा वो वहानि। अराधि होता निषदा यजीयान् अभि प्रयांसि सुधि
तानि हि ख्यत्। यजामहै यज्ञियान् हंत देवाँ ईळामहा ईड्याँ आज्येन। तद्य वाचः प्र

थमं मसीय येनासुराँ अभिदेवा असाम। ऊर्जाद उत यज्ञियासः पंचजना मम होत्रं जुषध्वं।
इति जपित्वा। उच्चैः पठति। अग्निर्होता वेत्त्वग्निर्होत्रं वेत्तु प्रावित्रं साधु ते यजमान देवता योऽग्
निं होतारमवृथाः। इति जपेत्। अथ समापयेत्। घृतवतीमध्वर्यो स्रुचमास्य
स्व देवयुवं विश्ववारे। ईळामहै देवाँ ईडेन्यान्नमस्याम नमस्यान्यजाम यज्ञियान्। अध्व
र्युर्घृतवतीं श्रुत्वा जुहूपभृतावादाय अत्याक्रम्य। अत ऊर्ध्वं दक्षिणेनात्याक्रमणं सव्येन
प्रत्याक्रमणं। आश्रावयति। ओ श्रा वय। आग्नीध्र उत्तरे स्फ्यमिध्मसंनहनानीत्यादा
य दक्षिणामुखस्तिष्ठन्प्रत्याश्रावयेत्। अस्तु श्रौषट्। इत्योंकारं प्लावयन्। अध्वर्युः समि
धो यज। होता। ये३ यजामहे समिधः समिधो अग्न आज्यस्य व्यंतु। वौ३षट्। इति वषट्कृ
त्वा वागोजः सह ओजो मयि प्राणापानौ। इति वषट्कारमनुमंत्रयते। आग्रे वैष
ट्कारयोरादिं याज्यांतं च प्लावयेत्सर्वत्र। अध्वर्युर्वषट्कृते पूर्वार्धे जुहोति। यजमानः।

दर्शेष्टौ॰ वसंतायेदं। वसंतमृतूनां प्रीणामि स मा प्रीतः प्रीणातु। अध्वर्युः ओ श्रा३वय। आग्नीध्रः अस्तु श्रौ
षट्। अध्वर्युः यज। होता। ये३ यजामहे तनूनपादग्न आज्यस्य वेतु३ वौ३षट्। वागोजः सह॰
२३ अध्वर्युर्वषट्कृते दक्षिणतो जुहोति। यजमानः। ग्रीष्मायेदं। ग्रीष्ममृतूनां प्रीणामि स मा प्रीतः प्री
णातु। इति द्वितीयो न्यत्र वसिष्ठशुनकात्रिवध्र्यश्वराजन्येभ्यः। तेषां। ये३ यजामहे नराशंसो
ऽग्न आज्यस्य वेतु३ वौ३षट्। वागोजः॰ इति तेषां द्वितीया तनूनपात्स्थाने। अध्वर्युराश्राव्य
